# Valmikiproktah Mahabharatatattvopadeshah

# વાલ્મીકિપ્રોક્તઃ મહાભારતતત્ત્વોપદેશઃ

## Document Information

Text title : Advice on the (Maha)Bharata Composition Conveyed by Valimiki to Vyasa

File name : mahAbhAratatattvopadeshaHvAlmIkikRRitaH.itx

Category : misc, advice, vyAsa, bRihaddharmapurANam

Location : doc_z_misc_general

Author : Valmiki

Proofread by : NA

Description/comments : Brihaddharmapuranam | pUrvakhaNDaH | adhyAyaH 30| 140 ||

Latest update : March 27, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 27, 2023

*sanskritdocuments.org*

# વાલ્મીકિપ્રોક્તઃ મહાભારતતત્ત્વોપદેશઃ

વાલ્મીકિરુવાચ ।
વેદવ્યાસ કિમાદૌ ત્વં શ્રોતુમિચ્છસિ સમ્પ્રતિ ।
તદહં ભારતાદીનાં વીજં તે પ્રવદામિ વૈ ॥ ૧॥

વ્યાસ ઉવાચ ।
કીદૃશં ભારતં નામ કિં ફલં તસ્ય તદ્વદ ।
કેન વાહં કરિષ્યામિ કેન શક્તિર્ભવેન્મમ ॥ ૨॥

વાલ્મીકિરુવાચ ।
ભારતં કૃતવાન્ પૂર્વં દેવો નારાયણઃ સ્વયમ્ ।
રામાયણં તસ્ય વીજં પરાત્પરતરં મતમ્ ॥ ૧૧॥

આદૌ રામાયણં દેવો બ્રહ્મણે દત્તવાન્ પુરા ।
દત્તઞ્ચ બ્રહ્મણા મહ્યં શ્લોકબદ્ધં મયા કૃતમ્ ॥ ૧૨॥

વિસ્તારિતઞ્ચ રુચિરં વેદાર્થસારસમ્મતમ્ ।
પુનશ્ચ ભારતં કર્તું બ્રહ્મણા દેશિતોઽપ્યહમ્ ॥ ૧૩॥

નૈવ સ્વીકૃતવાન્ પૂર્વં ભારતં કર્તુમેવ ચ ।
ભારતસ્ય વિધાનાય ત્વં નારાયણનિર્મિતઃ ॥ ૧૪॥

રામાયણાચ્ચ વિસ્તીર્ણં ત્વં મહાભારતં કુરુ ।
રામાયણપરીપાટ્યા ત્વં મહાભારતં કુરુ ॥ ૧૫॥

રામાયણસ્ય કાવ્યસ્ય ભારતસ્ય ચ વૈ મુને ।
વિશેષાત્ શ ृણુ મદ્વાક્યાન્નારાયણનિરૂપિતમ્ ॥ ૧૬॥

એક એવ સ્વયં દેવઃ પરમાત્મા વિભુઃ પ્રભુઃ ।
કાલાકાશસ્વરૂપોઽસૌ સુખદુઃખવિવર્જિતઃ ॥ ૧૭॥

સોઽયં માનુષતાં ગત્વા સ્વેચ્છયા કમલાપતિઃ ।

ચિક્રીડ જગતીમધ્યે રક્ષોવધચ્છલેન વૈ ॥ ૧૮॥

ધર્માંશ્ચ દર્શયામાસ વર્ણાશ્રમવિભાગશઃ ।
અહં તદ્વર્ણયિષ્યામિ કાવ્યં રામાયણાહ્વયમ્ ॥ ૧૯॥

પરમાત્મસ્વરૂપસ્ય સીતાનાથસ્ય ચેષ્ટિતમ્ ।
વર્ણિતં ચૈકરૂપસ્ય તચ્છરીરવિશેષવત્ ॥ ૨૦॥

સએવ દેવો ભગવાન્ કૃષ્ણઃ કમલલોચનઃ ।
જીવદ્વિતીયશ્ચિક્રીડ઼ ભૂભારક્ષયહેતવે ॥ ૨૧॥

જીવાત્મપરમાત્માનૌ નરનારાયણાવુભૌ ।
અર્જુનશ્ચ તથા કૃષ્ણસ્તાવેવ સ્વેચ્છયા સ્થિતૌ ॥ ૨૨॥

પઞ્ચાનાં પાણ્ડુપુત્રાણાં તૃતીયો યોઽર્જુનો નરઃ ।
કૃષ્ણશ્ચ દેવકીપુત્રો વાસુદેવોઽખિલાર્ત્તિહા ॥ ૨૩॥

નારાયણો વાસુદેવો નરશ્ચૈવાર્જુનાહ્વયઃ ।
નરનારાયણમયં તન્મહાભારતં વિદુઃ ॥ ૨૪॥

એકં નારાયણમયં કૃતં રામાયણં મયા ।
રામાયણે ભારતે ચ વિશેષોઽયમુદાહૃતઃ ॥ ૨૫॥

ગોપનીયો હ્યયં પન્થા ન વાચ્યં યસ્ય કસ્યચિત્ ॥ ૨૬॥

ઈદૃશં ભારતં પ્રોક્તં નરનારાયણાત્મકમ્ ।
ભારતં પરમં પુણ્યં ભારતં દેવસમ્મિતમ્ ।
ભારતં ભવને યસ્ય તસ્ય હસ્તગતો જયઃ ॥ ૨૭॥

ભારતસ્ય સમુદ્રસ્ય મેરોર્નારાયણસ્ય ચ ।
અપ્રમેયાણિ ચત્વારિ પુણ્યતોયગુહાગુણાઃ ॥ ૨૮॥

ભારતસ્યાન્તરીક્ષસ્ય કાલસ્ય ચ હરેરપિ ।
અપ્રમેયાણિં ચત્વારિ ભાવઃ સીમા ગતિઃ ક્રિયા ॥ ૨૯॥

ભારતસ્ય ચ ગઙ્ગાયા શિવસ્ય ચ હરેરપિ ।
અપ્રમેયાણિ ચત્વારિ નામપુણ્યાર્થશક્તયઃ ॥ ૩૦॥

ભારતં શ્રૂયતે સ્વર્ગે ભારતં શ્રૂયતે ક્ષિતૌ ।
ભારતં શ્રૂયતે ચૈવ પાતાલે પરમાદરૈઃ ॥ ૩૧॥

ભારતે વિવિધા અર્થા ભારતે વિવિધા કથા ।
ભારતે ષડ્દર્શનાનિ ભારતે ધર્મસઞ્ચયાઃ ॥ ૩૨॥

ન ભારતમનાશ્રિત્ય કથા કાચિત્ પ્રવર્ત્તતે ।
આહારમનપાશ્રિત્ય શરીરસ્યેવ ધારણમ્ ॥ ૩૩॥

યદ્રાત્રૌ કુરુતે પાપં બ્રાહ્મણસ્ત્વિન્દ્રિયૈશ્ચરન્ ।
મહાભારતમાખ્યાય પૂર્વાં સન્ધ્યાં વિમુઞ્ચતિ ॥ ૩૪॥

યદહ્ના કુરુતે પાપં બ્રાહ્મણસ્ત્વિન્દ્રિયૈશ્ચરન્ ।
મહાભારતમાખ્યાય સન્ધ્યાં મુઞ્ચતિ પશ્ચિમામ્ ॥ ૩૫॥

પૂજયેદ્ભારતં ગેહે સ્થાપયેત્ ભારતં ગેહે ।
દદ્યાચ્ચ ભારતં સદ્ભ્યઃ પઠેદપિ ॥ ૩૬॥

સ એવ પરમશ્રીમાન્ સાર્થકં તસ્ય જન્મ ચ ।
વૃષોત્સર્ગશતઞ્ચૈવ ગયાશ્રાદ્ધશતં તથા ॥ ૩૭॥

રાજસૂયાશ્વમેધૌ ચ યજ્ઞો વિપુલદક્ષિણૌ ।
સદક્ષિણૌ ભારતસ્ય શ્રવણં પાઠ એવ ચ ।
તુલ્યાન્યેતાનિ કર્માણિ મિથઃ પ્રતિનિધીન્યપિ ॥ ૩૮॥

દક્ષિણા ભારતસ્યાપિ આત્મા સર્વસ્વમેવ ચ ।
સર્વસ્વં ભારતે દદ્યાત્ સર્વસ્વં પિતૃમાતૃષુ ॥ ૩૯॥

સર્વસ્વં ગુરુવે દદ્યાત્ સર્વસ્વં યાચકે ક્રમાત્ ।
ઇત્યેવં તે ફલં પ્રોક્તં ભારતસ્ય સમાસતઃ ॥ ૪૦॥

॥ ઇતિ બૃહદ્ધર્મપુરાણે ત્રિંશત્તમોઽધ્યાયે વ્યાસમહર્ષે
વાલ્મિકીદ્વારા (મહા)ભારતતત્ત્વોપદેશઃ સમ્પૂર્ણઃ ॥

॥ બૃહદ્ધર્મપુરાણમ્ । પૂર્વખણ્ડઃ । અધ્યાયઃ ૩૦। ૧-૪૦॥

*Valmikiproktah Mahabharatatattvopadeshah*

pdf was typeset on March 27, 2023

Please send corrections to *sanskrit@cheerful.com*